चन्द्रभागाद्या हिमवत्पादनिःसृताः । आसां नद्युपनद्यश्च सन्त्यन्याश्च सहस्रशः । पश्चिमे कुरुपञ्चालमध्यदेशादयो-जनाः । पूर्व्वदेशादिकाश्चैव कामरूपनिवासिनः। ओड्राः कलिङ्गमगधा दाक्षिणात्याश्च सर्व्वशः। तथाऽपरान्ताः सौ-राष्ट्राः शूद्राभीरास्तथार्बुदाः । मारुकामालवाश्चैव पारिपात्र-निवासिनः । सौवीराः सैन्धवा हूणाःशाल्वाः शाकलवा-सिनः । मद्राभागास्तथाम्बष्ठाः पारसीकादयस्तथा । आसां पिबन्तः सलिलं वसन्ति सहिताः सदा। चत्वारि भार-ते वर्षे युगान्यत्र महामुने !। कृतं त्रेता द्वापरञ्च कलिश्चा-न्यत्र न क्वचित् । तपस्तप्यन्ति मुनयोजुह्वते चात्र यज्विनः। दानानि चात्र दीयन्ते परलोकार्थमादरात् । पुरुषैर्यज्ञ-पुरुषो जम्बुद्वीपे सदेज्यते । तत्रापि भारतं श्रेष्ठं जम्बुद्वीपे महामुने !। यतो हि कर्मभूरेषा ततोऽन्या-भोगभूमयः। अत्र जन्मसहस्राणां सहस्रैरपि स-त्तमः। कदाचिल्लभते जन्तुर्मानुष्यं पुण्यसञ्चयात् । गायन्ति देवाः किल गीतकानि धन्यास्तु ये भारतभूमिभागे स्वर्गापवर्गास्पदहेतुभूते भवन्ति भूयः पुरुषाः सुरत्वात् । कर्माण्यसंकल्पिततत्फलानि सन्न्यस्य विष्णौ परमात्म-रूपे । अवाप्य तां कर्म्ममहीमनन्ते तस्मिँल्लयं ये त्वमलाः प्रयान्ति । जानीम नैतत् क्व वयं विलीने स्वर्ग-प्रदे कर्म्मणि देहबन्धम् । प्राप्याथ धन्याः खलु ते मनुष्या ये भारते चेन्द्रियसङ्गहीनाः। नववर्षन्तु मैत्रेय ! जम्बुद्वीपमिदं मया । लक्षयोजनविस्तारं संक्षेपात् क-थितं मया" ४पृष्ठदण्डस्थ्नि पुंन० हला० स्वार्थे कन् । पृष्ठास्थिभेदे स्त्री अमरः । तृणकन्देऽपि स्त्री रत्नमाला "कशेरुकञ्चातियुक्तं श्लेष्मकोपकं यथाह सुश्रुतः। दिवा-स्वप्नेत्याद्युपक्रमे"कशेरुकशृङ्गाटकमधुरवल्लीफलसमशनाध्य-शनप्रभृतिभिः श्लेष्मा कोपमापद्यते" । एतद्रसस्य कूलचर-मांसभोजनेऽनुपानम् यथाह अनुपानवर्गे सुश्रुतः "कूल-चराणां शृङ्गाटककशेरुकासवः" । इदञ्च सुश्रुते मधुरवर्गे उक्तम् । तद्वाक्यं मधुरवर्गे द्रष्टव्यम् । एतस्य श्लेष्मपित्त प्रकोपकत्वेन क्रिमिकारित्वमुक्तम् सुश्रु०"माषपिष्टान्नद्विदल-विसशालूककशेरुकैरित्युपक्रमे "श्लेष्मा पित्तं च कुप्यति । क्रमीन् बहुविधाकारान् करोति विविधाश्रयान्" ।

कशेरुमत् पु० यवनराजभेदे । "इन्द्रद्युम्नोहतः कोपाद् यव-नस्य कशेरुमान्" हरिवं० १६अ० । भा० व० १२अ०।

कशोक त्रि० कश-ताडने बा० ओक । हिंसके राक्षसा-दौ "मा त्वा दभन् दूरे वासः कशोकाः" अथ० ५,२,४।

कश्चन अव्य०कः+विभक्त्यन्तात् चन इति मुग्ध०पाणिन्यमरमते पृथक् पदमिति भेदः । (केओ) इत्यर्थे "दमघोषसुतेन कश्चन प्रतिशिष्टः प्रतिभानवानथ" माघः। चित् । कश्चिद-प्यत्र अव्य०एकपदं द्विपदं वेति भेदः ।"कश्चित् कान्ता-विरहगुरुणा स्वाधिकारे प्रमत्तः" मेघ० ।

कश्मल न० कश-कल मुट् च । १मूर्च्छायां, २मोहे, "कुतस्त्वा कश्मलमिदं विषमे समुपस्थितम्" गीता । "मा राजन् ! कश्मलं घोरं प्राविशो बुद्धिनाशनम्"भा० स० ४४ अ० । वेदे पृषो० लस्य शः । कश्मश तत्रार्थे "विद्वेष कश्मशं भयममित्रेषु निदध्मसि" अथ० ३पापे च शब्दमा० ४मलिने त्रि० हेम० ।

कश्मीर पु० कश-ईरन् मुट् च । स्वनामख्याते देशभेदे । ततो भवादौ कच्छा०अण् । काश्मीर तद्देशभवे त्रि० । कश्मी-रोऽभिजनोऽस्य तक्षशिला०अञ् । काश्मीर पित्रादिक्रमेण तद्देशवासिनि त्रि०स्त्रियामुभयत्र ङीप् । तस्य राजन्यपि तथा । बहुषु तु तस्य लुक् । कश्मीराः। स्त्रियां भर्गादि० न लुक् । काश्मीरी । "अत ऊर्द्ध्वं जनपदान् निबोध गदतो मम"इत्युपक्रमे"कश्मीराः सिन्धुसौवीराः गान्धारा दर्शकास्तथा" भा० भी०९अ० जम्बुखण्डविभागे देश-कीर्त्तने । तद्देशसीमादि शक्तिसङ्गमतन्त्रे ७पटले उक्तं यथा—"शारदामठमारभ्य कुङ्कुमाद्रितटान्तकः । तावत् कश्मीरदेशः स्यात् पञ्चाशद्युयोजनात्मकः" ।

कश्मीरजन्मन् न०कश्मीरदेशे जन्म यस्य । कुङ्कुमभेदे । कश्मी-रजादयोऽप्यत्र । तद्भेदगुणादि भावप्र० उक्तं यथा— "कुङ्कुमं मसृणं रक्तं काश्मीरं पीतकं वरम् । सङ्कोचं पिशुन-न्धीरं वाह्लीकं शोणिताभिधम्। कश्मीरदेशजे क्षेत्रे कुङ्कुमं यद्भवेद्धि तत् । सूक्ष्मकेशरमारक्तं पद्मगन्धि तदुत्तमम् । वाह्लीकदेशसञ्जातं कुङ्कुमं पाण्डुरमतम् । केतकी-गन्धयुक्तन्तत् मध्यमं सूक्ष्मकेशरम् । कुङ्कुमम्पारसी-के यत् मधुगन्धि तदीरितम् । ईषत्पाण्डुरवर्णं तद-धमं खलु केशरम् । कुङ्कुमं कटुकं स्निग्धं शिरोरुग्-व्रणजन्तुजित् । तिक्तं वमिहरं वर्ण्यं व्यङ्गदोषत्रयापहम्"

कश्य न० कशत्यनेन कश-शब्दे बा० करणे यत् । १मद्ये वैज० । मद्यपानेन यथेष्टशब्दकरणात् तथात्वम् । कशामर्हति दण्डा० यत् । २कशाघातयोग्ये अश्वमध्य-भागे त्रि० अमरः ।

कश्यप पु० कश्यं पिबति पा-क उप० स० । ब्रह्मणो मानसपुत्रस्य मरीचेः पुत्रे ऋषिभेदे तस्य तन्नामनिरुक्ति-